श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ अन्नसूक्तम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

**श्रीः**

**श्रीमते रामानुजाय नमः**

**श्रीमते निगमान्तमहादेशिकाय नमः**

# ॥ अन्नसूक्तम् ॥

अ॒हम॑स्मि प्रथम॒जा ऋ॒तस्य॑।
पूर्वं॑ दे॒वेभ्यो॑ अ॒मृत॑स्य॒ नाभि॑ः।
यो मा॒ ददा॑ति॒ स इदे॒व मा᳚वाः।
अ॒हमन्न॒मन्न॑म॒दन्त॑मद्मि।
पूर्व॑म॒ग्नेरपि॑ दह॒त्यन्न᳚म्।
य॒त्तौ हा॑साते अहमुत्त॒रेषु॑।
व्यात्त॑मस्य प॒शव॑ः सु॒जम्भ᳚म्।
पश्य॑न्ति॒ धीरा॒ः प्रच॑रन्ति॒ पाका᳚ः।
जहा᳚म्य॒न्यं न ज॑हाम्य॒न्यम्।
अ॒हमन्नं॒ वश॒मिच्च॑रामि॥ **1** ॥

स॒मा॒नमर्थं॒ पर्ये॑मि भु॒ञ्जत्।
कोमामन्नं॑ मनु॒ष्यो॑ दयेत।
परा॑के॒ अन्नं॒ निहि॑तं लो॒क ए॒तत्।
विश्वै᳚र्दे॒वैः पि॒तृभि॑र्गु॒प्तमन्न᳚म्।
यद॒द्यते॑ लु॒प्यते॒ यत्प॑रो॒प्यते᳚।
श॒त॒त॒मी सा त॒नूर्मे॑ बभूव।

म॒हान्तौ॑ च॒रू स॑कृद्दु॒ग्धेन॑ पप्रौ।
दिवं॑ च॒ पृश्निं॑ पृथि॒वीं च॑ सा॒कम्।
तथ्स॒म्पिब॑न्तो॒ न मि॑नन्ति वे॒धसः॑।
नैतद्भूयो॒ भव॑ति॒ नो कनी॑यः॥ 2॥

अन्नं॑ प्रा॒णमन्न॑मपा॒नमा॑हुः।
अन्नं॑ मृ॒त्युं तमु॑जी॒वातु॑ माहुः।
अन्नं॑ ब्र॒ह्माणो॑ ज॒रसं॑ वदन्ति।
अन्न॑माहुः प्र॒जन॑नं प्र॒जाना॑म्।
मोघ॒मन्नं॑ विन्दते॒ अप्र॑चेताः।
स॒त्यं ब्र॑वीमि व॒ध इथ्स तस्य॑।
नार्य॒मणं॒ पुष्य॑ति॒ नो सखा॑यम्।
केव॑लाघो भवति केवला॒दी।
अ॒हं मे॒घस्स्त॒नय॒न्वर्ष॑न्नस्मि।
माम॑दन्त्य॒हम॑द्म्य॒न्यान्।
अ॒हग्ं सद॒मृतो॑ भवामि।
मदा॑दि॒त्या अधि॒ सर्वे॑ तपन्ति॥ 3॥

ओं शान्ति॒ः शान्ति॒ः शान्तिः॑॥

॥ इति अन्नसूक्तं समाप्तम्॥